|| দারিদ্র্যহর স্তোত্রম ||

হা কৃষ্ণ বদরীবাসিন ক্বাসি ব্যাস দয়ানিধে|
ইমামবস্থাং সংপ্রাপ্তমনাথং কিমুপেক্ষসে|| ১ ||
হা সচ্চিচ্ছুভদ ক্বাসি তর্কাভয়বিরাজিত|
ইমামবস্থাং সংপ্রাপ্তমনাথং কিমুপেক্ষসে|| ২ ||
হা কীটরাজ্যসংদায়িন ক্বাসি বাসিষ্ঠবংশজ|
ইমামবস্থাং সংপ্রাপ্তমনাথং কিমুপেক্ষসে|| ৩ ||
হা পারাশর্য় সর্বেশ ক্বাসি সত্যবতীসুত|
ইমামবস্থাং সংপ্রাপ্তমনাথং কিমুপেক্ষসে|| ৪ ||
হা তাপসশিরোরত্ন ক্বাসি দেবেশ তুষ্টিমন|
ইমামবস্থাং সংপ্রাপ্তমনাথং কিমুপেক্ষসে|| ৫ ||
হা বিদ্যামণিজন্মাঙ্কে ক্বাসি দ্বৈপায়নানঘ|
ইমামবস্থাং সংপ্রাপ্তমনাথং কিমুপেক্ষসে|| ৬ ||
হা শুদ্ধবুদ্ধিদ ক্বাসি বাদরায়ণ সর্বদা|
ইমামবস্থাং সংপ্রাপ্তমনাথং কিমুপেক্ষসে|| ৭ ||
হা দুর্বুদ্দিতমঃসূর্য় ক্বাসি বেদবিভাজক|
ইমামবস্থাং সংপ্রাপ্তমনাথং কিমুপেক্ষসে|| ৮ ||
সংসারকাননেঽজ্ঞানদ্বারকীলসুদুঃখিতম|
দারিদ্র্যদুঃসহাবস্থমনাথং পাহি মাং প্রভো|| ৯ ||
বিষয়াসক্তচেতোবাক্যরীরং দোষদূষিতম|
দারিদ্র্যদুঃসহাবস্থমনাথং পাহি মাং প্রভো|| ১০ ||
শ্রৌতস্মার্তক্রিয়াভ্রষ্টং বাহ্যশৌচবিবর্জিতম|
দারিদ্র্যদুঃসহাবস্থমনাথং পাহি মাং প্রভো|| ১১ ||
দুর্দানাদানকর্তারং দুরন্নে নিরতং সদা|

দারিদ্র্যদুঃসহাবস্থমনাথং পাহি মাং প্রভো || ১২ ||
পরদাররতং নিত্যং পরনিংদায়ুতং সদা |
দারিদ্র্যদুঃসহাবস্থমনাথং পাহি মাং প্রভো || ১৩ ||
আম্নায়জ্ঞেয়কায়াত্মন ভক্তভক্তিপ্রকাশিত |
অমংদানংদ মাং ব্যাস কৃপাদৃষ্ট্যা বিলোকয় || ১৪ ||
জননীবচনত্রাণপরায়ণ গুণায়ন |
অমংদানংদ মাং ব্যাস কৃপাদৃষ্ট্যা বিলোকয় || ১৫ ||
অচক্ষুঃপূর্বজাভেদ্যসংজয়জ্ঞানদ প্রভো |
অমংদানংদ মাং ব্যাস কৃপাদৃষ্ট্যা বিলোকয় || ১৬ ||
ব্যাখ্যাশক্তিপ্রদ শ্রীদ কবিতাপ্রদ মানদ |
অমংদানংদ মাং ব্যাস কৃপাদৃষ্ট্যা বিলোকয় || ১৭ ||
জ্ঞানদীপপ্রভাভাত ব্রহ্মাংডাংতর্বহিঃস্থিত |
অমংদানংদ মাং ব্যাস কৃপাদৃষ্ট্যা বিলোকয় || ১৮ ||
অশেষদোষদাবাগ্নে ভবাময়ভিষঙ্মণে |
অমংদানংদ মাং ব্যাস কৃপাদৃষ্ট্যা বিলোকয় || ১৯ ||
রাকাধিপকরাশ্লেষহর্ষনির্দোষপূরুষ |
অমংদানংদ মাং ব্যাস কৃপাদৃষ্ট্যা বিলোকয় || ২০ ||
ইমং মংত্রং পঠেদ্যস্তু শতবারং গুরোঃ শুচিঃ |
দদাতি তস্য সংপত্তিং শুকতাতো ন সংশয়ঃ || ২১ ||
|| ইতি শ্রীয়দুপত্যাচার্যকৃতং দারিদ্র্যহর (ব্যাস) স্তোত্রম ||